# संस्कृत वार्ता:

दिनाङ्क : 01.10.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा मोदिना प्रोक्तं यत् सङ्घ-लोकसेवा-आयोगस्य शतवार्षिकी-यात्रायां जन-विश्वासः अक्षुण्णः अस्ति।
- जन-सहभागितायाः संवर्धनाय श्वः देशव्यापी-विशेष-ग्राम-सभाः समाहूयन्ते।
- रक्षा-मन्त्रिणा राजनाथ-सिंहेन रक्षा-प्रबन्धनाय एकीकृत-वित्तीय-व्यवस्थायाः आवश्यकता प्रोदीरिता ।
- नागरिक-विमानयन-मन्त्रिणा वैमानिकस्य कैप्टन-स्मित-मच्छारस्य शौर्यस्य भूरिशः प्रशंसा विहिता।
- एशियाई-क्रीडासु भारत-पुरुष-हॉकी-दलेन पाकिस्तानं पराजित्य अन्तिम-स्पर्धायां प्रवेशः समधिगतः।

---------------------------------------------------

<u>प्रधानमन्त्री –यूपीएससी</u>

अद्य नवदिल्ल्याः भारत-मण्डपे सङ्घ-लोकसेवा-आयोगस्य शताब्दी-समारोहं सम्बोध्य प्रधानमन्त्री नरेन्द्र मोदी व्यजिज्ञपत् यत् राष्ट्रं परिष्कारार्थं द्रुतगत्या त्वरितम् अग्रे सरति। अतः परीक्षा-सञ्चालिकाः संस्थाः अपि राष्ट्रानुकूल-परिष्कृत-कार्याणि कुर्युः। प्रधानमन्त्रिणा प्रोक्तं यत् लोकसेवासु तादृशाः एव युवानः समागच्छेयुः, येषां लक्ष्यं न तु केवलं पद-प्राप्तिः, प्रत्युत निष्काम-भावेन लोक-सेवा वर्तते। असौ व्याहरत् यत् एकविंशति-शतकस्य भारतं नवीन-कार्य-संस्कृत्या सह अग्रे याति। श्रीमोदिना प्रतिपादितं यत् परीक्षा न तु काचित् सामान्यम् अनुष्ठानम्, अपितु यूनां भावि-जीवन-प्रवाहेन सह सम्बद्धा अस्ति। परीक्षासु कतिपयानां मासानाम् अपि विलम्बः यूनाम् कृते अतीव कष्टकरो भवति। अत एव परीक्षा-व्यवस्था समय-निश्चयता-सिद्धान्तम् दृढतया अनुसरेत्।

प्रधानमन्त्रिणा नरेन्द्र-मोदिना प्रतिपादितं यत् सङ्घ-लोकसेवा-आयोगस्य शतवर्षीयायां यात्रायाम् युगानि, प्रशासनानि, तन्त्राणि, पाठ्यक्रमाः च परिवर्तिताः। तथापि अस्यां संस्थायां जन-साधारणानां श्रद्धा-विश्वासः अद्य यावत् तथैव अविचलः अक्षुण्णश्च वर्तते।

-----------------------------------------------------

<u>विशेषग्रामसभाः</u>

श्वः गान्धीजयन्त्यावसरे अशेषे हि देशे विशेषग्रामसभाः समाहूयन्ते । पञ्चायतानां सुदृढीकरणाय, सार्वजनिकसेवानां परिष्कारार्थं, ग्रामीणभारते जीवनस्य गुणवत्तां परिष्काराय च लक्ष्यीकृतानां परिवर्तनशील-शासन-परिष्काराणां तथा उपक्रमाणां विषये च ते चर्चां करिष्यन्ति। ग्रामीणाभिवृद्धि-मन्त्रालयः अवदत् यत् एताः विशेषग्राम-सभाः षड्विंशत्यधिक द्विसहस्र सप्तविंशत्यधिक द्विसहस्र वर्षयोः पीपल्स-प्लान-कैम्पेन (पीपीसी), सबकी योजना, सबका विकास इत्यस्यापि आरम्भं विधास्यनित।

-----------------------------------------------------

<u>राजनाथ - रक्षा-लेखा-दिवस</u>

अद्य नवदिल्ल्यां रक्षा-लेखा-दिवस-समारोहमधिकृत्य भाषमाणः रक्षा-मन्त्री राजनाथ सिंहः अब्रवीत् यत् तिसृषु सैन्य-शाखासु या समवाय-समन्वय-भावना प्रवर्त्यते, सा एव रक्षा-लेखा-विभागस्य वित्तीय-तन्त्रेऽपि समन्वेतव्या। मन्त्रिप्रवरेण प्रोक्तं यत् यदि वित्तीय-प्रणाल्यः अपि एकीकृत-रूपं भजेरन्, तर्हि समग्रं रक्षा-प्रबन्धनं सुतराम् कुशलं समर्थञ्च सेत्स्यति। असौ राष्ट्रिय-अन्ताराष्ट्रिय-स्तरयोः गुणवत्तायुक्त-लेखा-परीक्षणस्य सर्वोत्तमाः रीतीः अङ्गीकर्तुम्, जगति च एधमानानां मानदण्डैः सह समन्वयं रक्षितुं रक्षा-लेखा-विभागं सप्रश्रयम् अबोधयत्।

-----------------------------------------------------

<u>स्वच्छता अभियान</u>

स्वच्छता हि सेवा अभियानस्यान्तर्गतम् अद्य देशव्यापी 'एकः दिवसः, एका होरा, एकीभूय' इति। स्वच्छता-श्रमदान-कार्यक्रमः उत्साहपूर्वकम् आयोजितः। अस्मिन् अभियाने बहुभिः केन्द्रीय-मन्त्रिभिः, मुख्यमन्त्रिभिः, वरिष्ठ-अधिकारिभिश्च भागः गृहीतः। विगत-मासस्य सप्तदश दिनाङ्कात् आरब्धम् इदम् अभियानम् अगामि-अक्टूबर-मासस्य सप्तदशदिनाङ्कं यावत् प्रवर्तिष्यते। अस्य वर्षस्य मुख्य-ध्येय-वाक्यम् 'स्वच्छतायां सहभागः, स्वच्छ-भारतम्, विकसित-भारतम्' इति अस्ति। नवदिल्ल्याः सफदरजङ्ग-समाधि-स्थानके विधि-न्याय-मन्त्री अर्जुनराम-मेघवालः स्वच्छता-कार्ये सहभागमकरोत्। असौ अब्रवीत् यत् स्वच्छता न तु केवलम् एकदिवसीयम् अभियानम्, अपितु अस्माकं दैनन्दिनं दायित्वं भवेत्। अपरञ्च, जलशक्ति-मन्त्री सी. आर. पाटीलः अपि नवदिल्ल्याः कालिन्दीकुञ्ज-घट्टे श्रमदानकार्ये सक्रियं योगदानम् अयच्छत्।

-----------------------------------------------------

## ऐच्छिक-रक्तदान-दिवसः

अद्य नवदिल्ल्याः लेडी-हार्डिङ्ग्-चिकित्सा-महाविद्यालये षड्विंशत्यधिक द्विसहस्रतम वर्षस्य राष्ट्रिय-ऐच्छिक-रक्तदान-दिवसः आचरितः। अस्मिन् अवसरे नीति आयोगस्य स्वास्थ्यःसदस्यः डा. एम्. श्रीनिवासः ऐच्छिक-रक्तदान-शिबिरस्य उद्घाटनम् अकरोत्। जनसमूहं सम्बोधयन् डा. श्रीनिवासः पर्याप्तं सुस्थिरं च रक्तपूर्तिं सुनिश्चेतुम् ऐच्छिक-रक्तदानस्य महत्त्वं उद्घाटितवान्। स्वास्थ्य-परिवार-कल्याण-मन्त्रालयः अवदत् यत् राष्ट्रव्यापी-बृहत्-स्वैच्छिक-रक्तदान-अभियानस्य भागत्वेन एतत् राष्ट्रिय-आचरणम् अस्ति।

-----------------------------------------------------

## राममोहन-नायडुः

नागरिक-विमानयन-मन्त्री राममोहन-नायडुः अब्रवीत् यत् देशः वैमानिकस्य कैप्टन-स्मित-मछारस्य असाधारण-साहसेन उपस्थिति-बुद्ध्या च अतीव गौरवान्वितः अस्ति, येन विमानस्थसर्वेषां यात्रिणां प्राणाः सुरक्षिताः। मन्त्रिप्रवरेण निगदितं यत् भारतीय-वैमानिकाः स्वकीयेन कौशलेन, अनुशासनेन, निष्ठापूर्ण-

सुरक्षा-प्रतिबद्धतया च जगति प्रतिष्ठां लब्धवन्तः। श्रीनायडुः आत्मनः पूर्वं सेवा इति भारतीय-भावनायाः उज्ज्वल-संरक्षणाय मच्छार-वर्याय भूरिशः प्रशंसा-कुसुमानि अयच्छत्।

-----------------------------------------------------

## पाकिस्तान वायु प्रहार

पाकिस्तानेन आफ़गानिस्तानस्य कुनार-हेलमन्द-मण्डलयोः नागरिक-गृहेषु कृत वैमानिक-आक्रमणेषु स्त्री-शिशून् समादाय न्यूनातिन्यूनं दश आफ़गान-नागरिकाः मृताः, एकादश अन्ये च व्रणिताः।
तालिबान-प्रवक्त्रा ज़बीहुल्लाह-मुजाहिद इत्यसौ अकथयत् यत् अस्मिन् आक्रमणे कुनार-मण्डलस्य शुल्तान-क्षेत्रे हेलमन्द-मण्डले त्रीणि भवनानि विनष्टानि। अस्य वैमानिक-प्रहारस्य तीव्रं विगर्हणं कुर्वन् मुजाहिद इत्यसौ प्रत्यारोपितवान् यत् पाकिस्तानदेशः स्वकीय-राजनैतिक-आर्थिक-सङ्कटेभ्यः जन-ध्यानम् अपसारयितुम् आफ़गानिस्तान-विरोधि-नीतिं समाश्रयति।

-----------------------------------------------------

## भारतीय-नौसैन्यबलानां

भारतीय-नौसैन्यबलानां प्रमुखः पोतः 'INS तर्कश स्वस्य यात्रा-क्रमे केन्या-देशस्य मोम्बासानगरस्य पोताश्रयं प्राप्नोत्। रक्षा-मन्त्रालयेन प्रोक्तं यत् अयं प्रवासः ऐतिहासिक-सांस्कृतिक-सम्बन्धैः सम्बद्धयोः भारत-केन्या-समुद्र-राष्ट्रयोः प्रगाढ-सम्बन्धान् द्रढयति। प्रवासावधौ उभयोः देशयोः नौसेन्यबलानां मध्ये व्यावसायिक-सामाजिक-सम्पर्काः, ज्ञान-विनिमयः, भावनानुकूलः सामुद्रिक-सुरक्षा-सहयोगः च प्रवर्तिष्यन्ते।

-----------------------------------------------------

## राष्ट्रिय-पेंशन-प्रणाली-दिवसस्य

अद्य नवदिल्ल्यां राष्ट्रिय-पेंशन-प्रणाली-दिवसस्य प्रसङ्गे आभासीयमाध्यमेन भाषमाणः मुख्य-आर्थिक-उपदेष्टा वी. अनन्त-नागेश्वरन् समवोचत् यत् कौटुम्बिक-सञ्चयानां विशालः अंशः दीर्घकालिक-पेंशन-योजनासु विनियोक्तुं नागरिकप्रोत्साहनं शासनस्य महती आवश्यकता वर्तते।

-------------------------------------------------------

<u>एशियाई-क्रीडायां</u>

जापानस्य काकामिगाहारा नगरे आयोजितायां एशियाई-क्रीडायां भारतीय-पुरुष-हॉकी-दलेन चिर-प्रतिद्वन्द्विनं पाकिस्तान-देशं चत्वारि-त्रिणी इति चक्रैः पराजित्य अन्तिम-स्पर्धायां प्रवेशो लब्धः।

शनिवासरे अन्तिम-क्रीडायां भारतस्य साम्मुख्यं दक्षिण-कोरिया-मलेशिया-देशयोः विजेत्रा सह भविष्यति। महिला-दलमपि श्वः चीन-देशेन सह स्पर्धिष्यते।

।। इति वार्ता: ।।